# विजयश्रीः २०११

एं ऐ एं हयर् सेकन्डरि स्कूल्,पेरोड्

वटकरा विद्याभ्यासजिल्ला।

पूर्णाङ्कः 40 समयः 1.30 HOURS

निर्देशाः

- सर्वे प्रश्नाः समाधेयाः।
- उत्तरलेखने देवनागरीलिपिः उपयोक्तव्याः।

**प्रतीक्षमाणः प्रश्नस्वरूपः**

१ अन्वयलेखनम्।

अ) आकाङ्क्षापूर्वकान्वयलेखनम्।

आ) श्लोकमधिकृत्य पृष्टानां प्रश्नानामुत्तरलेखनम्।

२ अलङ्कारप्रयोगः।

-निर्दिष्टालङ्कारयुक्तश्लोकनिर्धारणम्।

३ छन्दोबद्धता।

-आलापभेदयुक्तश्लोकचयनम्।

४ उपन्यासलेखनम् ।

-प्रदत्तास्सूचना उपयुज्य

यात्राविवरणात्मक/जीवनचरित्रात्मकोपन्यासरचना।

५ कथापात्रनिरूपणम्।

-निर्दिष्टस्य कथायाः कथापात्रस्य वा सयुक्तिकनिरूपणम् ।

६ भाषान्तरीकरणम् ।

-प्रदत्तायाः खण्डिकायाः प्रादेशिकभाषायां विवर्तनम्।

७ खण्डिकालेखनम् ।

-प्रदत्तास्सूचनाः उपयुज्य यात्राविवरण/जीवनचरित्रात्मकखण्डिका रचना

८ कोष्ठान्निर्धारणम्।

- प्रदत्तेभ्यः कोष्ठेभ्यस्समुचितोत्तरनिर्धारणम्।

९ खण्डिकात उत्तरलेखनम् ।

-प्रदत्तां खण्डिकां पठित्वा तदधिकृत्य पृष्टानां प्रश्नानामुत्तरलेखनम्।

१० वाक्यपरिवर्तनम्।

-कर्मणिप्रयोगानां कर्तरि कर्तरिप्रयोगानां च कर्मणि परिवर्तनम्

११ प्रश्नवाक्यनिर्माणम् ।

-प्रदत्तं वाक्यांशं पठित्वा निर्देशानुसारं प्रश्नवाक्यनिर्माणम्।

१२ लौकिकन्यायाः।

-लौकिकन्यायसम्बद्धाः घटनाः पठित्वा को न्यायः प्रवर्ततेऽत्रेति लेखनीयम्।

१३ यथोचितयोजनम्।

काव्यानां काव्यकराणां काव्यभेदानां च नाम महात्मनां तेषां प्रवर्तन मण्डलानां च नाम इत्यादयः सम्मिश्र्य दीयते। तस्मान्निर्देशानुसारं योजनीयम्।

१४ स्ववाक्यैरुत्तरलेखनम्।

निर्दिष्टस्य प्रश्नस्य एकेन वाक्येनोत्तरं लेखनीयम्।

१५ पदच्छेदनम्।सन्धीकरणम्।

१६ एकपदलेखनम्।

समस्तपदानां विग्रहितरूपं ददाति। तस्य समस्तपदरूपं लेखनीयम्।

१७ कथाविपुलनम्।

सूचनानुसारं कथालेखनं कार्यः। सर्वास्सूचनाः स्वीकरणीयाः।

१८ श्लोकलेखनम्

निर्दिष्टाशययुक्तं श्लोकं पाठभागादुद्धृत्य लेखनीयम्।

## व्याकरणांशाः

कोष्ठके प्रदत्तस्य पदस्य उचितरूपेण रिक्तस्थानानि पूरयत।/
प्रकोष्ठाद् उचितं रूपं स्वीकृत्य रिक्तस्थानानि पूरयत।

| | | |
|---|---|---|
| १ | ..................... परितः छात्राः तिष्ठन्ति। | [ अध्यापिका ] |
| २ | छत्रं ................... त्रायते। | [ आतपः ] |
| ३ | ................. उभयतः क्षेत्राणि सन्ति। | [ रथ्या] |
| ४ | मोदकं ................. रोचते । | [ बालकः ] |
| ५ | अहं ................... साकं विद्यालयं गच्छामि | [ पिता ] |
| ६ | रमेशः ................ पुत्रः। | [ किम् ] |
| ७ | सर्वतः ................ बालाः क्रीडन्ति। | [ वृक्षः ] |
| ८ | रमेशः ................. सह विद्यालयं गच्छति | [ मञ्जुला ] |
| ९ | दुर्जनाः .............. कुप्यन्ति। | [ सज्जनाः] |
| १० | वयं संस्कृतम् .................. । | [ पठ् ] |
| ११ | अध्यापकः ........... आदिदेश । | [ छात्राः ] |
| १२ | ...................... परितः पिपीलिकाः सन्ति। | [ शर्करा] |
| १३ | अहं ................. सह विद्यालयं गच्छामि | [ अध्यापकः ] |
| १४ | रामः ............. क्रुध्यति। | [ रावणः ] |
| १५ | रामः ................. सह वनमगच्छत्। | [ सीता] |
| १६ | त्वं..................... कक्ष्यायां पठसि। | [ किम् ] |
| १७ | ........................... परितः गोपिकाः नृत्यन्ति। | [ कृष्णः] |
| १८ | ........................ उभयतः वृक्षाः सन्ति। | [ मार्गः] |
| १९ | राजा ..................... क्रुध्यति । | [ सेवकः ] |
| २० | पिता .................. मारितः। | [ वनचोराः] |
| २१ | कृष्णेन ग्रामः ..............। | [ गच्छति, गम्यते] |
| २२ | रजनी पुस्तकं ..............। | [ पठति,पठ्यते ] |
| २३ | रमा ....................... लेखनीं पृच्छति। | [ अध्यापिका ] |
| २४ | बालिका .................. सह मन्दिरं गच्छति। | [ माता] |
| २५ | अनन्तः ......................... नगरे वसति। | [ किम् ] |

| | | |
|---|---|---|
| २६ | …………………………… बहिः छात्राः तिष्ठन्ति। | [ कार्यालयः] |
| २७ | आम्रं …………………….. रोचते। | [ शिशुः ] |
| २८ | रामः ……………………… बहिः अगच्छत्। | [ गृहम्] |
| २९ | …………………………… बालकस्य नाम किम्। | [ उत्तमः] |
| ३० | माता……………………… पोषयति। | [ बालः ] |
| ३१ | छात्रः ………………………. बहिः तिष्ठति। | [ कक्ष्या ] |
| ३२ | जनाः ………………………. बहिर्गच्छन्ति। | [ नगरम् ] |
| ३३ | पथिकः ……………………..नाम पृच्छति। | [ किम् ] |
| ३४ | बालाः ………………………. बहिः क्रीडन्ति। | [ गृहम् ] |
| ३५ | …………………………… परितः भ्रमराःभ्रमन्ति। | [ पुष्पम् ] |
| ३६ | छात्रैः पुस्तकं ………………..। | [ पठन्ति, पठ्यन्ते ] |
| ३७ | अध्यापकेन चित्राणि …………….. । | [ निरीक्ष्यति ,निरीक्ष्यन्ते] |
| ३८ | सावित्री नृत्तं …………………। | [ परिशीलयति,परिशील्यते ] |
| ३९ | बाला …………………….. पुष्पं यच्छति। | [ शङ्करात्, शङ्कराय] |
| ४० | माता रुदन्तं बालकं………… अलं इति समाश्वासयत् । | [रोदनम् ] |
| ४१ | पित्रा निवारितोऽपि सः………न अवततार। | [ शकटम् ] |
| ४२ | श्रीशङ्करः ………………… समं भारते सर्वत्र पर्यटनं चकार। | [शिष्याः] |
| ४३ | कक्ष्यायां…………………… अलम् इति अध्यापकः निवारितवान्। | [सम्भाषणम्] |
| ४४ | रामः सीतया सह…………गतवान्,………पर्णाश्रमं निर्माय अवसत् च। | [ वने, वनम् ] |
| ४५ | वामनः बलिं ………… अयाचत। | [वसुधया/वसुधाम् ] |

**प्रश्नस्वरूपाः**

**गानम् / काव्यम् / महाकाव्यम्**

१ १ पट्टिकाकरणम्।
२ १ श्लोकं पठित्वा प्रश्नानामुत्तरलेखनम्।
३ १ सूचनानुसारं पुटेनैकेन लेखनम्।
४.१. आस्वादनटिप्पणिलेखनम्।
२. आशयलेखनम्।
३. खण्डिकालेखनम्।
५.१. आलापभेदयुक्तश्लोकचयनम्।
२. आलापसाम्ययुक्तश्लोकचयनम्।
३. गणक्रमलेखनम्।
६ १. निर्दिष्टाशयप्रकाशकश्लोकलेखनम्।
७.१. आकाङ्क्षापूर्वक अन्यलेखनम्।
२. अन्वयलेखनम्।
३. गद्यक्रमलेखनम्
८ १ निर्दिष्टालङ्कारयुक्तश्लोकचयनम्।
९ १ सकारणम् इष्टतमश्लोकलेखनम्।
१० १ एकेन पदेन उत्तरलेखनम्।

**गानम् / काव्यम् / महाकाव्यम्**

**१ पट्टिकाकरणम्।**

**१.१ स्तोत्रकाव्यानि महाकाव्यानि सञ्चित्य पट्टिकारूपेण लिखत।**
(रघुवंशम्, सौन्दर्यलहरी, विशाखविजयम्, नारायणीयम्, केरलोदयम्, किरातार्जुनीयम्)

**१.२ प्रदत्तेषु स्तोत्रकाव्यं महाकाव्यञ्च उद्धृत्य लिखत।**
(रघुवंशम्, ऋतुसंहारम्, नवभारतम्, सौन्दर्यलहरी)

**१.३ महाकाव्यानि चरित्रकाव्यानि च विविच्य लिखत।**

(नवभारतम्, क्रिस्तुभागवतम्, केरलोदयम्, मूषिकवंशम्, श्रीकृष्णविलासम्, किरातार्जुनीयम्)

**१.४ प्रदत्तेषु स्तोत्रकाव्यानि महाकाव्यानि इतिहासकाव्यानि चरित्रकाव्यानि च उद्धृत्य लिखत।**
(श्रीकृष्णविलासम्,सौन्दर्यलहरी,किरातार्जुनीयम्,गीतगोविन्दम,क्रिस्तुभागवतम्, वाल्मीकिरामायणम्, मुकुन्दमाला, नारायणीयम्, रघुवंशः )

१.५ अभिज्ञानशाकुन्तलस्य इतिवृत्तं कस्मात् स्वीकृतं भवति।
(महाभारतात्, रामायणात्, महाभागवतात्)

१.६ द्रौपदीवचोभिः सूचिता युधिष्ठिरावस्था का।
(अलसता, अधीरता, अकर्मण्यता, उदारता)

१.७ किं गणे नान्तर्भवति।( ओथल्लो, हांलट्, नागानन्दम्)

१.८ किरातार्जुनीयं कस्मिन् काव्यविभागे अन्तर्भवति।(महाकाव्ये, चरित्रकाव्ये, खण्डकाव्ये)

१.९ धनम् इत्यर्थकं पदं विवेचयत(धाम, मणिः, वसुः)

१.१० किं गणे नान्तर्भवति। ( ओथल्लो, हितोपदेशः, पञ्चतन्त्रम्)

१.११ ओथल्लो नाटकस्य कर्ता भवति (टोल्स्टोयि, षेक्स्पियर्, मार्क्सिं गोर्कि)

१.१२ कः सौवर्णमङ्गुलीयकं विक्रेतुम् आपणं प्राप्तवान्(स्यालः, धीवरः, स्वर्णकारः)

**२ श्लोकं पठित्वा प्रश्नानामुत्तरलेखनम्।**

**२.१ श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत।**

२.१.१ विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः।।

क) श्लोके कं वर्णयति।

ख) अकुप्यं इत्यस्य अर्थः कः।

ग) कस्याः वाक्यमिदम्।

घ) धनञ्जयः केन उपमितः।

२.१.२ व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति श  ास्तथाविधानसंवृताङ्गान् निशिता इवेषवः।।

क) कीदृशाःमूढाः पराभवं व्रजन्ति।

ख) मूढान् के घ्नन्ति।

ग) निशिताः इषवः कथमिव घ्नन्ति।

घ) पराजयः इत्यस्य समानार्थकं पदं उद्धृत्य लिखत।

ङ) इवेषवः इत्यस्य पदच्छेदं लिखत।

२.१.३ भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः।।

क) कस्य कं प्रति वचनमिदम्।

ख) गर्हिते मार्गे कः वर्तते।

ग) रेखाङ्कितस्य पदस्य पदच्छेदं लिखत।

घ) श्लोकस्याशयं स्ववाक्यैः लिखत।

२.१.४ परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिरिरेणुरूषितः।
महारथःसत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः।।

क) कमुद्दिस्य अयं श्लोकः।

ख) अत्र सत्यधनशब्देन सूचितः कः।

ख) अस्मिन् श्लोके क्रियापदं किम्।

घ) लोहितचन्दनोचितः वृकोदरःअद्य कीदृशः भवति।

ङ) महारथः इति विशेषणेन भीमस्य कः गुणः प्रकाश्यते।

च) कच्चित् इत्यव्ययं कस्मिन्नर्थे प्रयुज्यते।

२.१.५ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।

क) अस्मिन् श्लोके क्रियापदं किम्।

ख) किमर्थं व्यवसाययन्ति।

ग) कीदृशाः दुराधयः।

घ) कीदृशमनुशासनम्।

२.१.६ विजित्य यःप्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः।।

क) अस्मिन् श्लोके क्रियापदं किम्।

ख) कः मन्युं न करोति।

ग) श्लोके क्रोधः इत्यर्थे प्रयुक्तं पदं किम्।

घ) तवाधुनाहरन् इत्यत्र सन्धिच्छेदःकः

२.१.७ विजित्य यःप्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः।।

क) अस्मिन् श्लोके क्रियापदं किम्।

ख) धनञ्जयः किं न करोति।

ग)  कीदृशं वस्तु अयच्छत्।

घ)  धनञ्जयः कीदृशः आसीत्।

ङ)  वसु इत्यस्य अर्थ किम्।

२.१.८ सामिपीतरसभङ्गसङ्गतक्रोधभारपरिभूतचेतसा।
मन्थदण्डमुपगृह्यपाटितं हन्तदेव दधिभाजनं त्वया।।

क)  किं पाटितम्।

ख)  केन पाटितम्।

ग)  कीदृशेन त्वया।

घ)  किमुपगृह्यपाटितम्।

**३ सूचनानुसारं पुटेनैकेन लेखनम्।**

**३.१ सूचनानुसारं पुटेनैकेन लिखत**

३.१.१ उलूखलबन्धनम्।

सूचना - यशोदया कृतं पुत्रलालनं ,दहने दुग्धं परिस्रुतं, क्षीरपानभग्नः, दधिभाजनस्य पाटनम् , उलूखले बन्धनम्, पाशानामभावः, बन्धनाय अनुमतिः,देवानां विस्मयः।

३.१.२ पुष्पकविमानम्।

सूचना - मणिवज्रचित्रितम्,महाप्रयत्नेन निर्मितम्, अनेकसंस्थानविशेषनिर्मितम्, मारुततुल्यगामि बहुकूटमण्डितम्,निशाचरैर्वहन्तं,वसन्तमासादपि चारुदर्शनम्।

**३.१.३ प्रदत्तस्य श्लोकस्याशयं सूचनासाहाय्येन लिखत।**

सम्पूर्णकुम्भो न करोतिशब्दमर्धोघटो घोषमुपैति नित्यम्।
विद्वान् कुलीनो न करोतिगर्वमल्पोजनो जल्पति साट्टहासम्।।

सूचना - कुम्भः-घटः। घोषम्- शब्दम्। उपैति- करोति। अल्पः - अल्पज्ञानी।

**३.१.४ पुष्पकविमानस्य सविशेषताःसूचनानुसारं लिखत।**

सूचना -मणिवज्रचित्रितम्,जाम्बूनदजालकृत्रिमम्,मनस्समाधानविचारचारिणं मारुततुल्यगामिनं,बहुकूटमण्डितम्,निशाचरैर्वाह्यमानम् ।

**४ आस्वादन टिप्पणिलेखनम्।**

**४.१.१ प्रदत्तस्य श्लोकस्य साहाय्येन कवेर्नारायणभट्टपादस्य वर्णनाचातुरीं प्रदर्शयत।**

वेदमार्गपरिमार्गितं रुषा त्वामवीक्ष्य परिमार्गयन्त्यसौ।
सन्ददर्श सुकृतिन्युलूखले दीयमाननवनीतमोतवे।।

४.२.१ **श्लोकं पठित्वा आशयं लिखत।**

विशेषमालम्ब्य विशेषसंस्थितं विचित्रकूटं बहुकूटमण्टितं।
मनोऽभिरामं शरदिन्दुनिर्मलं विचित्रकूटं शिखरं गिरेर्यथा।।

३ परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिरिरेणुरूषितः।
महारथःसत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः।।

अस्मिन् श्लोके कविः कं वर्णयति। पूर्वं सःकीदृशः आसीदिति श्लोकानुसारं विशदयत।

४ **श्लोकं पठित्वा भीमसेनस्यावस्थां स्ववाक्यैर्लिखत।**

परिभ्रमंल्लोहितचन्दनोचितः। पदातिरन्तर्गिरिरेणुरूषितः।
महारथःसत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः।।

५ **प्रदततस्य श्लोकस्य आशयं लिखत।**

स्थीयतां चिरमुलूखले खलेत्यागता भवनमेव सा यदा।
प्रागुलूखलविलान्तरे तदा सर्पिररपितमदन्नवास्थिताः

४. **खण्डिकालेखनम्।**

४.३. १ हनुमता दृष्टं पुष्पकविमानं कथमासीत्। खण्डिकारूपेण लिखत।

४.३. २ द्रौपदीवचोभिःसूचिता युधिष्ठिरावस्था का।

४.३. ३ पुष्पकविमानस्य सौन्दर्यातिशयहेतुकानि विशेषणानि कानि।

४.३.४ **सूचनाः उपयुज्य हनुमता दृष्टं पुष्पकविमानं वर्णयत।**

तपः पराक्रमेण च सम्पादितम् - अनेकदिशागतियुक्तम् - अवश्यसन्निवेशैः युक्तम् - मारुततुल्यगामी - देवानामालयम् - बहुकूटमण्डितम् - गिरेः शिखरं यथा।

४.३.५ **प्रदत्ताःसूचनाः आधारीकृत्य विनोदयात्रामधिकृत्य सुहृदं प्रति लेखमेकं लिखत।**

विनोदयात्रा विनोदाय विज्ञानाय च। परस्परं परिचयः - बस्यानं -तिरुवनन्तपुरं मृगशाला पद्मनाभस्वामिमन्दिरं-कन्याकुमारी - सूर्यास्तमनम् -विवेकानन्दमण्डपम् - तिरुवल्लुवर् शिला- प्रत्यागमनम्।

५ **आलापभेदयुक्तश्लोकचयनम्।**

५.१. **प्रदत्तेषु आलापनभेदयुक्तं श्लोकं विविच्य लिखत।**

**अधः प्रदत्तेषु आलापनभेदयुक्तं श्लोकं विविच्य लिखत।**

**आलापभेदयुक्तःश्लोकः क इति विवेचयत।**

**कः श्लोकःआलापने व्यत्यस्थं प्रकटयति।**

५.१. १ विस्मितोत्स्मितसखीजनेक्षितां स्विन्नसन्नवपुषं निरीक्ष्य तां
नित्यमुक्तवपुरप्यहो हरे बन्धमेव मन्यथाः।।
२ मनस्समाधाय तु शीघ्रगामिनं दुरावरं मारुततुल्यगामिनं
महात्मनां पुण्यकृतां महर्द्धिनां यशस्विनामग्र्यमुदामिवालयम्।।
३ स्थीयतां चिरमुलूखले खलेत्यागता भवनमेव सा यदा।
प्रागुलूखलबिलान्तरे तदा सर्पिरर्पितमदन्नवास्थिताः।।
५.१. ४ अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्य वैभवं
तन्नरं वपुषि कुञ्जरं मुखे मन्महे किमदि तुन्दिलं महः
५ हरिन्मणिश्यामरुचीनि तत्र स्वैरं चरन्तीषु तृणानि गोषु।
शौरिःस्वयं भुक्त इवाप तृप्तिं तृप्यन्त्युदाराः परतर्पणेन।।
६ गौरवं कथमियं सहेत मे मेदिनीति कृपयेव चिन्तयन् ।
माधवः पतनभीतिमुद्वहन् मन्दमेव निदधेः पदावलिम्।।
५.१. ७ यद्यपाशसुगमो विभो भवान् संयतः किमु सपाशयानया।
एवमादि दिविजैरभिष्टुतो वातनाथ परिपाहि मां गदात्।।
८ भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः।।
९ स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिवज्रचित्रितं
प्रतप्तजाम्बूनदजालकृत्रिमं ददर्श धीमान् पवनात्मजः कपिः।।
५.१. १० यद्यपाशसुगमो विभो भवान् संयतः किमु सपाशयानया।
एवमादि दिविजैरभिष्टुतो वातनाथ परिपाहि मां गदात्।।
११ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।
१२ अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्मकार्मुकं जटाधरः सञ्जुहुधीह पावकम्
५.१. १३ तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणेः धैर्यच्युतिं के मम धन्विनोऽन्ये।।
१४ वर्णप्रकर्षे सति कर्णिकारः दुनोति निर्गन्धितया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः।।
१५ गच्छता दशरथेन निर्वृतिं भूभुजामसुलभां भुजाबलात्।
मातुलस्य नगरे युधाजितः स्थापितौ भरतलक्ष्मणानुजौ।।

५.१. १६ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।
१७ वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम्।।
१८ गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यःक इवापहारयेन्मनोरमामात्मवधूमिव श्रियम्।।

**अधः दत्तेषु एकस्य श्लोकखण्डस्यालापने भेदोऽस्ति। ताललयानुसारं तस्यालापनं कृत्वा आलापनभेदयुक्तं श्लोकं उद्धृत्य लिखत।**

५.१. १९ तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः
अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।।
२० जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।।
२१ अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं
स्थलेऽब्जमवरोपितं सुचिरमूषरेवार्षितम्।।

**५.२ आलापसाम्ययुक्तं श्लोकमन्यं लिखतु।**

५.२. १ वेदमार्गपरिमार्गितं रुषा त्वामवीक्ष्य परिमार्गयन्त्यसौ।
सन्ददर्श सुकृतिन्युलूखले दीयमाननवनीतमोतवे।।

**५.३ गणक्रमलेखनम्।**

**५.३.१ गणयित्वा वृत्तं च निर्णयत।**

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।

**६. निर्दिष्टाशयप्रकाशकश्लोकलेखनम्।**

**अधः प्रदत्तस्याशयप्रतिपादकं श्लोकांशं चित्वा लिखत।**

६. १ भगवान् बन्धनमनुमन्यते इत्यर्थप्रतिपादकं श्लोकं विविच्य लिखत।

२ कपटिषु शुद्धबुद्धिं प्रदर्शयन्तः विचारशून्यः पराभवं व्रजन्ति। युद्धे असंवृताङ्गान् भटान् तीक्ष्णशराः भृशं घ्नन्ति। एतदाशयप्रकाशकं श्लोकं पाठभागादनुस्मृत्य लिखत।

३ अधः प्रदत्तस्याशयप्रतिपादकं श्लोकांशं चित्वा लिखत।
मम कठिनाः मनोव्यथाः एव मामेवं वक्तुं व्यवसाययन्ति/

४ भगवन्तं बन्धुं पाशमपर्याप्तम् इत्याशयप्रतिपादकम् श्लोकमुद्धृत्यलिखत।

**७ अन्वयलेखनम्।**

**७.१ आकाङ्क्षापूर्वक अन्वयं लिखत।**

**७.२ अन्वयं लिखत। श्लोकस्यान्वयं लिखत। अधो निर्दिष्टस्य श्लोकस्यान्वयं लिखत।**

**७.३ प्रदत्तस्य पद्यस्य गद्यक्रमं पूरयत।**

७.१. १ यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति।।

२ रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम्।
लङ्कापुरीं पुष्पकञ्च हृत्वा तत्रावसत् सुखम्।।

**७.२ श्लोकस्यान्वयं लिखत**

७.२. १ स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिवज्रचित्रितम्।

# लौकिकन्यायावलिः

१ स्वकीयमल्पमपि ज्ञानमाधारीकृत्य बहुपाण्डित्यं प्रकटयन्तः केचिदल्पज्ञाः यथार्थज्ञानिनां पुरतः क्रीडावन्तः पराजयं भजन्ते। अस्यां घटनायां कः न्यायः प्रवर्तते।

२ कश्चन कृषकः कदलीक्षेत्रं पालयति स्म। क्षेत्रस्य समीपे नारिकेलवृक्षाश्चासन्।कदाचित् सुमहती वृष्टिः चण्डवातश्चाभवत्। ततस्स क्षेत्रसमीपमगच्छत्। दूरादेव नारिकेलवृक्षान् निपतितान् जले मग्नान् च दृष्ट्वा कदल्याःसर्वाः नाशमुपगताः इति सः अवगतवान्।

३ कश्चन धीवरः नौकया मत्स्यबन्धनार्थं समुद्रान्तर्भागं गतः। झटिति तस्य नौका आवर्ते अपतत्। भीतःसः उच्चैः रोदनमकरोत्। किन्तु तस्य रोदनं वृथा अभवत्।

४ शृगालेन वञ्चितः सिंहः कूपे अपतत्। प्राणरक्षार्थं सः विलपति स्म। परं विलापः व्यर्थः जातः।

५ कश्चन वणिक् । रत्नसञ्चयं वहति।रात्रौ वनेनगमनम्। एकाकी। तस्कराणामाक्रमणम्। सम्पदां नाशः।उच्चैर्विलापः। रक्षणाय न कोऽपि आगतः।तस्य प्रयत्नः विफलो जातः।

६ ग्रामे सर्वत्र मारकरोगःव्याप्तः। तेन केचन मृताः। जनास्सम्भूयाधिकारिणे रोगनिर्माजनार्थं बहुवारं निवेदनं दत्तवन्तः। तथापि किमपि प्रतिकरणं नासीत्।

७ निरीक्षणार्थमागतः पर्यवेक्षकः द्वित्रान् छात्रान् परीक्ष्य कक्ष्या समीचीना इति निरणयत्। अत्र कः न्यायः प्रवर्तते।

८ आत्मानं पण्डितं मन्यते मूढः।विज्ञानां गोष्ठ्यां तस्याविवेकः प्रकटो भवति। अत्र कः न्यायः एकस्मिन् दिने जोसफःविमाननिस्थानं द्रष्टुं गतवान्। तत्र बहुकालानन्तरमागतमात्मसुहृदं दृष्ट्वा सः अतीव सन्तुष्टः जातः। अत्र कः न्यायः प्रवर्तते।

१० कश्चन बालकः पिपासया नदीतीरं गतवान्।तत्र बहूनि सोपानानि सन्ति। अवरोहणसमये झटिति पतित्वा मृतवांश्च। अत्र को वा लौकिकन्यायः युक्तः।

११ समस्वभावात् समुदायादन्यतमं गृहीत्वा परीक्षणेन समुदायस्य सर्वस्यापि स्वभावः निर्णी यते। अत्र को वा लौकिकन्यायः युक्तः।

१२ वनमहिषस्य पादाघातेन सिंहोऽपि नूनं निपतेत्। पुनः वनेचराणामवस्था का। अत्र को वा न्यायः युक्तः।

१३ कश्चन पुरुषः नारिकेलवृक्षमारुह्य फलसमूहादेकं पक्वं ज्ञात्वा सर्वाणि फलानि सञ्चिनोति स्म। सर्वेषां फलानां पाकतामधिकृत्यावगतिः केन न्यायेनात्र सञ्जाता।

१४ कक्ष्यायां पद्यपाठं सम्यक् पाठयित्वा अध्यापिका तया पाठितं छात्रैरवगतं वा न वेति जिज्ञासया कांश्चित् छात्रान् प्रश्नानपृच्छत्। छात्रास्समीचीनमुत्तरं दत्तवन्तः। तेषामुत्तरं श्रुत्वा पाठितः पद्यभागः छात्रैः ज्ञातः इति सा अजानात्।अत्र को वा लौकिकन्यायः युक्तः।

१५ एकदा कोऽपि कृषकः क्रमुकफलानां विक्रयणार्थं विपणिं गतवान्। स आपणिकस्य पुरतः क्रमुकं स्थापितवान्। आपणिकः तानि कर्तनंकृत्वा परीक्षितवान्। तदनन्तरंउत्तमानि तानि इति दृष्ट्वा कृषकाय प्रतिफलं अदात्। अत्र कः न्यायः युज्यते।

## सन्धिच्छेदं लिखत

| | | |
|---|---|---|
| १ | वेति। | १० गिरेर्शिखरम्। |
| २ | वसुधैव। | ११ तूलिकयेव। |
| ३ | वसिष्ठकोऽस्वस्थोऽभवत्। | १२ वपुर्विभक्तम्। |
| ४ | विशेषमालम्ब्य। | १३ मृगमुपसृत्यावोचत्। |
| ५ | शुष्कमिवाग्निरुच्छिखः। | १४ क्षुद्रबुद्धिर्नाम जम्बूकोऽहम् |
| ६ | बाल्य एव। | १५ त्वमात्मानम्। |
| ७ | प्रदर्शितवानयम्। | १६ मृतवत्सन्दर्श्य। |
| ८ | सिंहोऽपि निपतेन्नूनम्। | १७ वातेनोदरम्। |
| ९ | इत्युद्घोषयन्नयम् | १८ तत्रागत्य। |

| | |
|---|---|
| १९ उपस्थितोऽचिन्तयत्। | २२ सर्वमेतत्। |
| २० उपस्थापितवानयम्। | २३ पश्यन्नवर्तत। |
| २१ अस्माल्लोकात्। | २४ तस्माददतितराम्। |

**समस्तपदानि**

| | | | |
|---|---|---|---|
| १ | निरुद्धा गतिःयस्य सः। | २५ | गोलिका एव अस्त्रं............... । |
| २ | वृद्धः च असौ वानरः च। | २६ | गोलिकास्त्रस्य प्रयोग । |
| ३ | कुण्डलैः शोभितं आननं येषां ते। | २७ | आन्त्रस्यमाला............... ताम् । |
| ४ | ऊर्ध्वं मुखं यस्य सः। | २८ | उन्नतस्य भावः । |
| ५ | निर्गता दया यस्याःसा। | २९ | पादस्य आघातः............ तेन । |
| ६ | महतः वचनम्। | ३० | शत्रोः निरीक्षणम्। |
| ७ | भोक्तुं इच्छा। | ३१ | जीवस्य रक्षणम्। |
| ८ | अत्यन्तं महान् | ३२ | क्षुत् पिपासा च क्षुत्पिपासे ताभ्यां पीडितः । |
| ९ | वने भवः। | | |
| १० | धीरस्य भावः । | ३३ | इतिहासं विदन्ति इति । |
| ११ | अक्ष्णोः परम्। | ३४ | भृशं जयति । |
| १२ | वञ्चयितुं कामो यस्य सः। | ३५ | धरति इति .......... । पयसां धरः............। |
| १३ | भोक्तुं कामो यस्य सः। | | |
| १४ | दिने दिने । | ३६ | स्निग्धः च असौ हासः । |
| १५ | पदे पदे । | ३७ | प्रयत्नं कृतवन्तः । |
| १६ | ज्ञातुम् इच्छा। | ३८ | अत्यन्तं प्रचारं प्राप्तः । |
| १७ | मोक्तुं इच्छा । | ३९ | सूचनारूपेण परिचयः । |
| १८ | केरैः करम्बिता सा । | ४० | मिश्रणं कृत्वा । |
| १९ | विपुलनवाम्बुदा एव दिवपथिका यस्यां। | ४१ | गीतं वाद्यं नृत्तं च । |
| | | ४२ | अरूपं रूपवन्तं करोति । |
| २० | कुटिला मतिः यस्या सा । | ४३ | अन्यः देशः । |
| २१ | प्रतिवेशे भवः । | ४४ | विमर्शनेन सहवर्तत इति । |
| २२ | पवनस्य आत्मजः । | ४५ | अत्यन्तं वृद्धः। |
| २३ | भयेन धावनम् । | ४६ | वृद्धः ज्यायान् । |
| २४ | अयसा निर्मितः कवचः । | ४७ | दुष्कवय एव कुञ्जरः। |

४८ उद्दण्ड एव केसरी ।
४९ वेदान्त एव वनं.........
तत्र सञ्च
५२ बलिं भुञ्जते इति ।
५३ अण्डात् जातः ।
५४ अन्येषु देशेषु ।
५५ अहनि अहनि।
५६ प्रमदा जनेन उदितम् ।
५७ भवन्त इव दृश्यन्ते इति ।
५८ नार्यःसमया............
निरस्ताः नारीसमयाः यैः ते।
५९ दुष्टाः आधयः ।
६० मूढा धीः येषां ते।
६१ गुणैः अनुरक्ता या सा ........
ताम्।
६२ अनुरक्तं साधनं यस्य सः।
६३ कुलस्य अभिमानो यस्य सः।
६४ कुले जाता इति.............. ताम्।
६५ नराणां अधिपः।
६६ मनः रमयति इति।
६७ मनः दृढं अस्य अस्ति इति
६८ नराणां देवः।
६९ शम्याः तरुः।
७० उद्गतः शिखा यस्य सः ।
७१ लोहितं च तत् चन्दनम् ।
७२ पदाभ्यां अतति इति ।
७३ रेणुभिः रूषितः।
७४ गिरिषु अन्तः।
७५ महान् रथः यस्य सः।
७६ वृकस्योदरमिव उदरं विद्यते यस्य
सः।
७७ सत्यमेव धनं यस्य सः।
७८ वासव उपमा यस्य सः।
७९ वल्कानि एव वासांसि।
८० कुप्यात् अन्यत् ।
८१ धनं जयति इति।
८२ न कठिना ।
८३ वनान्त एव शय्या ।
८४ कचैः आचितौ ।
८५ न गच्छति इति ।
८६ अगे जातौ ।
८७ धृतिः च संयमः च।
८८ द्विषन्तः निमित्तं यस्याः सा ।
८९ मूलेन सह वर्तत इति ।
९० न पर्यासिता ।
९१ पुरः सरन्ति इति ।
९२ धाम विद्यते येषाम्..........
तेषाम्।
९३ निर्गतः आश्रयः यस्याः सा ।
९४ मनस्विनः भावः।
९५ दुखेन सोढुं शक्यम् ।
९६ अत्यन्तं दुस्सहम् ।
९७ निरस्त विक्रमो येन सः।
९८ लक्ष्म्याः पतिः।
९९ धरति इति .....जटानां धरः... ।
१० खण्डं खण्डं कल्पितः।
१०१ विस्रगन्धस्य गन्धः............
विस्रगन्ध अस्य अस्ति इति.....।
१०२ हस्ते गृहीतपत्रः ।

१०३गृध्राय बलिः ।

१०४जालेन जीवितुं शीलमस्यास्ति इति

१०५परिमुक्तं बन्धनं यस्य सः।

१०६दानं कारितः।

१०७विविच्य ज्ञानं ...........

१०८तस्य इदम् ।

१०९मम इदम् ।

११०अन्यत् द्वीपम् ।

१११सेनां नयति इति ।

११२मार्गस्य मध्ये ।

११३कुटिलः मतिः यस्य स ।

११४बद्धः हृदयः यस्य सः ।

११५ संशयितं मनः यस्य सः।

**खण्डिका/ उपन्यास लेखनम्**

१ मार्गदर्शकः पुत्रः इति कथां संगृह्य तदुद्दिष्टं सन्देशं लिखत।

२ मार्गदर्शकः पुत्रः इति कथायां वसिष्ठकः कीदृश इति सोदाहरणं निरूपयत।

३ मार्गदर्शकः पुत्रः इति पाठस्याधारेण वसिष्ठकस्य तस्य पुत्रस्य च स्वभावान् निरूपयत।

४ मार्गदर्शकः पुत्रः इत्यस्मिन् पाठे भवतां इष्टतमं कथापात्रं किम्। सकारणं विशदयत।

५ मार्गदर्शकः पुत्रः इति कथायां बोधिसत्वेन उपदेशः कथं दत्त इति विशदयत।

६ *पुत्र उन्मीलितं त्वया मम नेत्रं* - अत्र वसिष्ठकस्य मनोन्मीलनं पुत्रेण कथं कृतमिति सङ्क्षिप्य लिखत।

७ काक्कश्शेरि महोदयस्य जननसम्बन्धिनीं ऐतिह्यकथां स्ववाक्यैःसङ्क्षिप्य लिखत।

८ उद्दण्डशास्त्रिणःस्वभावं निरूपयत।

९ *पलायध्वं पलायध्वं रे रे दुष्कविकुञ्जराः ।*
*वेदान्तवनसञ्चारि ह्यायात्युद्दण्डकेसरिः ।।*
इति श्लोकानुसारं उद्दण्डस्य स्वभावविशेषान् निरूपयत।

१० काक्कश्शेरिमहाभागः महाबुद्धिशालिः आसीत् इति कथा कमपि कथासन्दर्भं उदाहृत्य लिखतु।

११ उलूखलबन्धनम् इत्यस्मिन् काव्यभागे अन्तर्गतां कथां स्ववाक्यैः लिखत।

१२ उलूखलबन्धनकथां लिखत।

१३ इयागोः उपजापकस्य फलं किमासीत् इति विशदयत।

१४ ओथल्लः भार्यां हन्तुमेव निश्चितवान्। अत्र जायावधस्य कारणानि सङ्क्षिप्य लिखत।

१५ पतिपरायणायाः डस्डिमोणायाः स्वभावं स्ववाक्यैः निरूपयत।

१६ हनुमता दृष्टं पुष्पकविमानं कथमासीत्। खण्डिकारूपेण लिखत।

१७ पुष्पकविमानस्य सविशेषतामधिकृत्य लघुटिप्पणिः लिखत।

१८ पुष्पकविमानस्य सविशेषताःलिखत।

१९ हनुमता दृष्टं पुष्पकविमानं वर्णयत।

२० मुद्राङ्गुलीयक लाभः इति नाटक भागं  कथारूपेण लिखत।

२१ धीवरेणोक्ता अङ्गुलीयकलाभकथा तस्यपरिणामश्च लिखत।

२२ अभिज्ञानाङ्गुलीयकदर्शने दुष्यन्तेन स्मृता पूर्वकथा का।

२३ मुद्राङ्गुलीयक लाभः इति नाटकं कथारूपेण संगृह्य लिखत।

२४ अभिज्ञानशाकुन्तलमधिकृत्य पुटेनैकेन विवृणुत।

२५ संस्कृतभाषामधिकृत्य एकं लघूपन्यासं लिखत।

२६ विनोदयात्रायाःप्राधान्यं विशदयत।

२७ कार् यानस्य चालकेनोक्ता घटना का इति विशदयत।

२८ सिंहभूमौ वनमहिषःइति लेखने उपवर्णितां कामपि घटनां स्ववाक्यैःसङ्क्षिप्य लिखत।

२९ कार् यानस्य चालकेनोक्ता घटना का इति विशदयत।

३० जयजयमामक पुण्यधरे इति पाठभागमधिकृत्य केरलीयप्रकृतिसौन्दर्यमधिकृत्य एकां खण्डिकां लिखत।

३१ केरलोदयस्य काव्यकर्तुः परिचायनपत्रं लिखत।

३२ द्रौपदीवचांसि गद्यरूपेण संगृह्य लिखत।

३३ युधिष्ठिरं प्रति द्रौपदीवचांसि  स्ववाक्यैः लिखत।

३४ श्रीशङ्कराचार्यमधिकृत्य एकां खण्डिकां लिखत।

**सूचनानुसारं कलाविशेषं विशदयत।**

३५ संस्कृतनाटकाभिनयस्य प्रकारभेदः -मिलित्वा नटनम् - चतुर्विधानामभिनयम् -वाद्यविशेषः रूपकाणामांशिकावतरणम् - युनेस्को अङ्गीकारः।

३६ कथाकेल्यां कूटियाट्टे च दृश्यमानानि त्रीणि वैजात्यानि लिखत।

३७ कथाकेल्यां कूटियाट्टे च साजात्यवैजात्यानि कानि इति लिखत।

३८ कूटियाट्टान्तर्गतान् चाक्यार्कूत्त् सम्बन्धिनश्च विषयान् विविच्य लिखत।

३९ कूटियाट्टस्य कथाकेल्याः च साजात्यवैजात्यान् लिखत।

४० नाट्यप्रधानानां त्रयाणां केरलीयकलारूपाणां नाम लिखत।तेषु एकां कलामधिकृत्य पञ्च वाक्यानि लिखत।

४१ युष्माकं इष्टतमं  केरलीयदृश्यकलामधिकृत्य लघुटिप्पणिः लिखत।

**एकेन पदेन उत्तरं लिखत।**

४२ मुद्राङ्गुलीयकलाभ इति नाटकभागः कस्मात् ग्रन्थात् उद्धृतः।

४३ मुद्राङ्गुलीयकलाभाख्ये नाटकभागे धीवरेण लब्धे अङ्गुलीयके लिखितं नाम किमासीत्।

४४ अस्मिन्नवसरे आफ्रिक्कादेशादागतः मूर्वंशीयः वर्णेन कृष्णः ओथल्लः वेनीस् नगर्यां सेनानी बभूव। वाक्यमेतत्पठित्वा अधोदत्तपदानि उत्तरत्वेन लब्धुं युक्तं प्रश्नचतुष्टयं लिखत।

१ आफ्रिक्कादेशादागतः२सेनानी ३वर्णेन कृष्णः४ मूर्वंशीयः

४५ निर्जीवमपि वस्तु वीरमारणकारणं स्यात् ।कस्यां कथायां एष आशयःप्रकटितः। को वा कथाकारः।

* * *